# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ८** | गुणाः - ७० |
| विषयः – सर्वदर्शनम् | **कोड – C.E.1.1.2** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – १४/१२/२०१६ | सन्दर्भग्रन्थः – साङ्ख्यतत्त्वकौमुदी (१-३१ कारिकापर्यन्ता) | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु द्वयोः कारिकयोः ससन्दर्भं व्याख्यां लिखत।** ०८

(१) दुःखत्रयाभिघाताद् जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्॥

(२) मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः॥

(३) असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्॥

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरं लिखत।** ०८

(१) त्रिविधप्रमाणस्य यथाग्रन्थं वर्णनं कुरुत
(२) विद्यमानमपि वस्तु किमर्थं न उपलभ्यते इति ग्रन्थोक्तदिशा वर्णयत।

**प्रश्नः – ३ अधोलिखितेषु द्वयोः उपरि टिप्पणीं लिखत।** ०४

(१) लिङ्गलिङ्गिपूर्वकम्।
(२) "महदादि तच्च कार्यम्"।
(३) "आनुश्रविकः"।
(४) "प्रमेयसिद्धिः प्रमाणाद्धि"।

**प्रश्नः – ४ अधोनिर्दिष्टेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) दुःखं कतिविधम्?
(२) तद्विपरीतः कः श्रेयान्?
(३) विकारः कतिविधः?
(४) प्रकृतिविकृतयः कति?
(५) अनुमानं कतिविधम्?
(६) साङ्ख्यकारिकाकारः कः?
(७) साङ्ख्यदर्शने कति तत्त्वानि सन्ति?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु द्वयोः कारिकयोः ससन्दर्भं व्याख्यां लिखत।** ०८

(१) हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥

(२) प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्चगुणा॥

(३) प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरं लिखत । ०८**

(१) सत्त्वादित्रिविधगुणस्य यथायथं वर्णनं लिखत

(२) पुरुषबहुत्वं यथाग्रन्थं संसाधयत

**प्रश्नः – ७ अधोलिखितेषु द्वयोः उपरि टिप्पणीं लिखत । ०४**

(१) अव्यक्तम् ।

(२) कैवल्यम् ।

(३) साङ्ख्यतत्त्वकौमुदी ।

(४) "पङ्ग्वन्धवद् उभयोः संयोगः"।

**प्रश्नः – ८ अधोनिर्दिष्टेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं यच्छत ०५**

(१) विषादात्मकः कः गुणः ?

(२) प्रसवधर्मि किम् अस्ति ?

(३) विवेकी कः अस्ति ?

(४) प्रकाशकः गुणः कः अस्ति ?

(५) भेदानां कारणं किम् अस्ति?

(६) सङ्घातः किमर्थं भवति ?

(७) कयोः संयोगेन सर्गः भवति?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु द्वयोः कारिकयोः ससन्दर्भं व्याख्यां लिखत । ०८**

(१) अधयवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्॥

(२) सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्॥

(३) युगपच्चतुष्टयस्य तु वृत्ति क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत । ०८**

(१) साङ्ख्यदर्शनानुसारं सृष्टेः उत्पत्तिः कथं भवतीति यथाग्रन्थं प्रतिपादयत

(२) करणानां प्रवृत्तिः कथं भवतीति विषये एकं निबन्धं लिखत

**प्रश्नः – ११ अधोलिखितयोः एकां टिप्पणीं लिखत । ०२**

(१) ज्ञानेन्द्रियाणि ।

(२) कर्मेन्द्रियाणि ।

**प्रश्नः – १२ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखत ०२**

(१) किं नाम करणम् ?

(२) करणानां प्रवृत्तिः कथं भवति?

(३) उभयात्मम् इन्द्रियं किम्?

(४) किं नाम अभिमानः ?

***

**Answer Key**

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ८** | गुणाः - ७० |
| विषयः – सर्वदर्शनम् | **कोड – C.E.1.1.2** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – १४/१२/२०१६ | सन्दर्भग्रन्थः – साङ्ख्यतत्त्वकौमुदी (१-३१ कारिकापर्यन्ता) | |

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १**

**प्रश्नः – २**

**प्रश्नः – ३** १.

**प्रश्नः – ४** १. त्रिविधम्

२. प्रकृतिपुरुषविवेकः

३. षोडशविधः

४. सप्त

५. त्रिविधम्

६. ईश्वरकृष्णः

७. पञ्चविंशतिः

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५**

**प्रश्नः – ६**

**प्रश्नः – ७** १.

**प्रश्नः – ८** १. तमोगुणः

२. व्यक्तं तथा प्रधानम् ।

३. पुरुषः

४. सत्त्वगुणः

५. अव्यक्तम् ।

६. परार्थम् ।

७. प्रकृतिपुरुषयोः

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९**

**प्रश्नः – १०**

**प्रश्नः – ११** १.

**प्रश्नः – १२** १. इन्द्रियम्

२. युगपत् क्रमशश्च

३. मनः

४. अहङ्कारः ।